# तार्किकः वृषभः

एकस्मिन् ग्रामे एक: पुरुष: वसति। स: बहु बुद्धिमान्, तर्कशास्त्रज्ञः अपि। एकदा सः पिष्टं क्रेतुम् आपणं गच्छति। पेषकं वदति– “भोः! पिष्टम् आवश्यकम्।” पेषकः– “अस्तु! ददामि, किञ्चित् तिष्ठतु,” इति उक्त्वा अन्यत्र गच्छति। तर्कशात्रज्ञः तत्र एव तिष्ठति। सः पश्यति एकः वृषभः तस्य पेषणयन्त्रेण सह योजितः अस्ति। यदा सः वृषभः पेषणयन्त्रस्य परितः चलति, तत् पेषणयन्त्रं कार्यं करोति, पेषणम् अपि भवति। तस्य कण्ठे एका घण्टा अपि अस्ति। यदा सः चलति, सा घण्टा शब्दं करोति।

तावत् पेषकः आगच्छति। तस्मै पिष्टं ददाति। तर्कशात्रज्ञः पिष्टं स्वीकरोति तं वदति च - “भोः! एका शंका अस्ति।” पेषकः वदति– “भवान् पण्डितः। अहं तु सरलः कृषकः। भवतः शङ्कायाः उत्तरं कथं ददामि?” तर्कशास्त्रज्ञः वदति– “प्रश्नः सरलः एव। अहं ज्ञातुम् इच्छामि किमर्थं सा घण्टा वृषभस्य कण्ठे अस्ति? किं तस्य उपयोगम्? किमर्थं धनं व्ययीकरोति?” पेषकः हसति । सः वदति– “यदा सः वृषभः यन्त्रस्य परितः चलति, घण्टा शब्दं करोति। शब्दं श्रुत्वा अहं जानामि वृषभः स्वस्य कार्यं करोति। तावत् अहम् अपि मम कार्यं करोमि। यदा शब्दः न भवति, अहं जानामि वृषभः कार्यं न करोति। तदा अहम् आगत्य तं ताडयामि। सः पुनः कार्यं करोति। अहमपि मम कार्यं करोमि। यदि एषा घण्टा नास्ति तर्हि अहम् अत्र एव तिष्ठामि। अन्यत् किमपि कार्यं कर्तुं न शक्नोमि। इत्यर्थम् एव एषा घण्टा वृषभस्य कण्ठे अस्ति।”

तर्कशास्त्रज्ञः चिन्तयति। पुनः पृच्छति– “किन्तु यदि सः न चलति, केवलं तस्य शिरं दोलायते, तर्हि भवान् कथं जानाति सः कार्यं करोति वा न?” पेषकः वदति– “महोदय! सः तु सरलः वृषभः एव। भवान् इव तार्किकः नास्ति।”

अभिप्रायः– कदाचित् अधिका बुद्धिः विपत्तिजनका। तया कथं कार्यं त्यजामः तस्य एव चिन्तनं कुर्मः। श्रमं कर्तुं न इच्छामः। अत एव सरलं जीवनं सरलं चिन्तनं च आवश्यकम्। – श्रीलप्रभुपादः

शब्दमञ्जूषा

तार्किकः = logical, तर्कशास्त्रक्ज्ञः = logician, पिष्टम् = flour, क्रेतुम् = to buy, आपणः = shop, पेषकः = miller, पेषणयन्त्रम् = millstone, दोलायते = to shake, कदाचित् = sometimes